दिनाङ्क _____________

**डी ए वी पब्लिकविद्यालयाः, दिल्ली-एन.सी.आर.**

**संस्कृतम् (R2)**

**आदर्शप्रश्नपत्रम् (2026-27)**

**अर्धवार्षिकी परीक्षा**

**कक्षा - नवमी**

**समयः – होरात्रयम्** **पूर्णाङ्काः - 80**

**सामान्य-निर्देशाः -**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 20 प्रश्नाः सन्ति।
3. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | | | |
|---|---|---|---|---|
| **'क'** | **खण्डः** | : | **अपठितावबोधनम्** | **10 अङ्काः** |
| **'ख'** | **खण्डः** | : | **रचनात्मककार्यम्** | **15 अङ्काः** |
| **'ग'** | **खण्डः** | : | **अनुप्रयुक्तव्याकरणम्** | **25 अङ्काः** |
| **'घ'** | **खण्डः** | : | **पठितावबोधनम्** | **30 अङ्काः** |

4. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
5. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
6. प्रश्नस्य क्रमाङ्क: प्रश्नपत्रानुसारम् एव लेखनीयः।
7. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
8. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।
9. अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति।

**खण्डः - 'क' (अपठित-अवबोधनम्) (10 अङ्काः)**

1 **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** 10

समयो हि अन्येषां वस्तूनाम् अपेक्षया अधिक महत्त्वपूर्णः मूल्यवान् च वर्तते। अन्यानि वस्तूनि विनष्टानि पुनरपि लब्धुं शक्यन्ते परं समयो विनष्टो न केनापि उपायेन पुनः परावर्तयितुं शक्यते। जनाः द्विधा समयस्य दुरुपयोगं कुर्वन्ति - व्यर्थयापनेन अकार्यकरणेन च। अनेके जनाः कार्यसम्पादने समर्थाः अपि निरर्थकं समयं यापयन्ति। इतस्ततः भ्रमन्ति। ते तु स्वार्थाय न च परार्थाय किञ्चित् कार्यं कुर्वन्ति। न धर्मम् आचरन्ति, न धनम् उपार्जयन्ति, तेषां जन्म निरर्थकं भवति। भूमिरपि एतादृशानां निष्क्रियाणां भारं वोढुं नेच्छति। ईदृशाः जनाः कस्मै अपि न रोचन्ते न वा कश्चित् तेभ्यः आश्रयमेव दातुमिच्छति। ते यत्र-यत्र गच्छन्ति ततः एव बहिष्क्रियन्ते। पितरौ अपि एतादृशान् तनयान् न अभिनन्दतः। अतः अस्माभिः आलस्यं विहाय सर्वदैव समयस्य सदुपयोगः कर्तव्यः।

**अ. एकपदेन उत्तरं लिखत - (केवलं प्रश्नद्वयम् )** 2×1=2

(i) पितरौ एतादृशान् कान् नाभिनन्दतः ?

(ii) कः विनष्टः परावर्तयितुं न शक्यते ?

(iii) का निष्क्रियाणां भारं वोढुं नेच्छति ?

**आ. पूर्णवाक्येन उत्तरं लिखत - ( केवलं प्रश्नद्वयम् )** 2×2=4

(i) केषां जन्म निरर्थकं भवति?

(ii) अन्येषां वस्तूनामपेक्षया कः महत्त्वपूर्णः मूल्यवान् च ?

(iii) जनाः कथं समयस्य दुरुपयोगं कुर्वन्ति ?

**इ. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत ।** 1×1=1

**ई. यथानिर्देशम् उत्तरत -** 3×1=3

(i) 'जनाः द्विधा समयस्य दुरुपयोगं कुर्वन्ति।' अस्मिन् वाक्ये कर्तृपदं किम् ?

(क) जनाः (ख) समयस्य

(ग) द्विधा (घ) कुर्वन्ति

(ii) 'सदुपयोगः' इत्यस्य पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

(क) समर्थाः (ख) दुरुपयोगः

(ग) अभिनन्दतः (घ) मूल्यवान्

(iii) 'ईदृशाः जनाः कस्मै अपि न रोचन्ते।' इत्यत्र विशेष्यपदं किम् ?

(क) ईदृशाः (ख) अपि

(ग) रोचन्ते (घ) जनाः

खण्डः - 'ख' ( रचनात्मकं कार्यम् ) (15 अङ्काः)

2 **भवती गरिमा । भवत्याः सखी श्वेता गायनप्रतियोगितायां प्रथमं स्थानं प्राप्तवती। अस्मिन् लिखिते शुभकामनापत्रे मञ्जूषायां प्रदत्तपदैः रिक्तस्थानानि पूरयित्वा पत्रं पुनः लिखत -** (10×½=5)

शिमलातः

दिनाङ्कः

__________

प्रिय श्वेते !

(i) ______________ नमोनमः।

समाचारपत्रेण ज्ञातं यत् भवती राष्ट्रिय-गायन-प्रतियोगितायां (ii) ____________ स्थानं प्राप्तवती, पठित्वा अतीव (iii) ___________अनुभवामि। त्वं बाल्यकालात् एव (iv) __________ गृहीतवती प्रतिदिनं (v) __________ च कृतवती इति अहं जानामि । अनेकाः विपरीतपरिस्थितयः अपि त्वया सोढः। अद्य तव परिश्रमस्य आत्मविश्वासस्य च (vi) ___________ अभवत्। सफलतायाः प्रथमं सोपानं भवत्या आरूढम् । अस्मिन् अवसरे मम

(vii) __________ स्वीकरोतु । भविष्ये अपि एवमेव (viii) __________ भवेत् इति मम इच्छा अस्ति। मातापित्रोः चरणेषु मम (ix) _________ निवेदयतु ।


भवत्याः सखी

(x) __________

**मञ्जूषा**

| |
|---|
| गरिमा, शुभकामनाम्, विजयः, संगीतशिक्षाम्, सफलता, प्रसन्नताम्, प्रणामाः, सप्रेम, अभ्यासम्, प्रथमम् |

3 **अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत -** 5×1=5



**मञ्जूषा**

| |
|---|
| भारतद्वारम्, सैनिकाः, गणतन्त्रदिवसः, पथसञ्चलनम्, ध्वजोत्तोलनम्, भवति, राष्ट्रियपर्वः, अवकाशः, जनसमूहः, प्रसन्नाः, सन्ति, करतालनम्, कुर्वन्ति |

**अथवा**

**मञ्जूषायां प्रदत्तशब्दानां सहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत -**

**"प्रातः भ्रमणम्"**

| |
|---|
| प्रातःकालः, मन्दः, पवनः, शीतलः, मनोहराणि दृश्यानि, सर्वत्र, सर्वे, पुष्पाणि, बालकाः, उद्यानस्य, क्रीडन्ति, भ्रमन्ति । |

4 **अधोलिखितं संवादं मञ्जूषायां प्रदत्तवाक्यानां सहायतया पूरयत –** 5×1=5

**पवनः** - नमोनमः अथर्व! त्वं किमर्थं चिन्तितः असि ?

**अथर्वः** - (i) ______________________________

**पवनः** - इदं तु श्रेयस्करम्। शान्तचित्तेन तिष्ठ।

**अथर्वः** - न, न, एतत् विना तु अहं प्राणहीनः एव अनुभवामि ।

**पवनः** - (ii) ______________________________

**अथर्वः –** किमर्थम् ?

**पवनः -** (iii) ________________________________

**अथर्वः -** न, न एतत् तु अति सहायकम् अस्ति अस्माकं कृते।

**पवनः -** सत्यम्। परम् अतिप्रयोगेण तु समयस्य हानिः एव भवति (iv)

__________________________________________

**अथर्वः -** (v) _______________________________ । अधुना अहम् अपि अस्य प्रयोगं समयानुसारेण करिष्यामि।

**मञ्जूषा**

- एतत् एव यन्त्रं तव जीवनस्य अमूल्यं समयं नाशयति।
- तदा त्वं महामूर्खः असि।
- अतः समयानुगुणं विवेकपूर्णः अस्य प्रयोगः करणीयः।
- धन्यवादः, त्वं सम्यक् कथयसि।
- मित्र! अद्य मम चलभाषियन्त्रं कार्यं न करोति।

**अथवा**

**अधोलिखितां कथां मञ्जूषायां प्रदत्तपदानां सहायतया पूरयित्वा पुनः लिखत-** -

10×½=5

एकदा गुरुः द्रोणाचार्यः सर्वान् शिष्यान् धनुर्विद्याम् अशिक्षयत्। सः वृक्षे स्थितं (i) ____________दर्शयित्वा शिष्यान् अवदत् - खगस्य (ii) ____________ लक्ष्यं साधयत । गुरोः आज्ञां श्रुत्वा सर्वे शिष्याः लक्ष्यं साधयितुं प्रयत्नम् अकुर्वन्। तदा (iii) __________ शिष्यान् अपृच्छत् "यूयं किं पश्यथ?" शिष्याः उत्तरम् अयच्छन् गुरुदेव! वयं खगं (iv) ___________। एतत् उत्तरं श्रुत्वा गुरुः सन्तुष्टः न अभवत् । तदा सः (v) __________ अपृच्छत्- 'भो अर्जुन! त्वं किं पश्यसि? (vi) ________________अवदत् हे गुरुवर! अहं खगस्य नेत्रं पश्यामि । अर्जुनस्य (vii) _____________ प्रति एकाग्रतां दृष्ट्वा गुरुः द्रोणाचार्यः अतिप्रसन्नः (viii) ___________ तस्मै आशीषं दत्तवान् यत् "त्वं श्रेष्ठः (ix) ____________भविष्यसि । अर्जुनः गुरुम् अनमत्। एवम् अर्जुनः द्रोणाचार्यस्य प्रियः शिष्यः (x) ______________।

**मञ्जूषा**

| |
|---|
| लक्ष्यम्, खगम्, द्रोणाचार्यः, भूत्वा, अभवत्, उपरि, अर्जुनः, धनुर्धरः, |

**खण्डः - 'ग' (अनुप्रयुक्त - व्याकरणम्) (25 अङ्काः )**

5. **अ. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत-** 3×1=3

(i) अतः <u>**प्रति + एकं**</u> व्ययस्य लेखः स्थापनीयः ।

(ii) तथापि तस्मिन् सः न <u>**आसीत् + एव**</u> ।

(iii) धनस्य अपव्ययेन धनहानिः <u>**स्वास्थ्यहानिरपि**</u> जायते ।

**अथवा**

**आ. अधोलिखितवाक्येषु रेखांकितपदानां सन्धिं सन्धिविच्छेदं वा कुरुत -**

(i) स्वास्थ्यहानिकारणात् पुनः <u>**धनव्ययो वर्धते**</u>।

(ii) ब्राह्मे मुहूर्ते <u>**चोत्थाय**</u> धर्ममर्थं च चिन्तयेत्।

(iii) किं भवन्तौ <u>**महात्मानम् + नामदेवं**</u> जानीतः ?

**6. उपपदविभक्ति-आधारेण विकल्पेभ्यः चित्वा रिक्तस्थानानि पूरयत -** 3×1=3

(i) एषः बालः ______________सह शास्त्रार्थम् अपि करिष्यति।

(क) अस्माकं (ख) अस्मान्

(ग) अस्माभिः (घ) वयम्

(ii) ______________ परितः वृक्षाः सन्ति।

(क) पाठशालया (ख) पाठशालायाः

(ग) पाठशाला (घ) पाठशालाम्

(iii) अध्यापिका ______________ पुस्तकानि ददाति।

(क) छात्रेभ्यः (ख) छात्राणाम्

(ग) छात्रेषु (घ) छात्रान्

**7. प्रदत्तविकल्पेभ्यः उचितं शब्दरूपं चित्वा रिक्तस्थानानि पूरयत -** 3×1=3

(i) भ्राता रक्षाबन्धने ______________ उपहारं यच्छति।

(क) गीता (ख) गीतायै

(ग) गीतायाः (घ) गीतया

(ii) अहम् ______________ विद्यालये पठामि।

(क) तस्याम् (ख) तस्मै

(ग) तस्मात् (घ) तस्मिन्

(iii) नृपः साधुभ्यः ______________ निर्माणं करिष्यति।

(क) आश्रमाणाम् (ख) आश्रमम्

(ग) आश्रमेषु (घ) आश्रमेण

**8. प्रदत्तविकल्पेभ्यः उचितं धातुरूपं चित्वा रिक्तस्थानानि पूरयत -** 3×1=3

(i) रामः सीतया सह भोजनम् ______________।

(क) अकुर्वन्　　　　　　　　(ख) अकुरुतम्

(ग) अकरोत्　　　　　　　　(घ) अकरवम्

(ii) यूयं स्वभूमिं ______________ ।

(क) सेवते　　　　　　　　(ख) सेवध्वे

(ग) सेवामहे　　　　　　　　(घ) सेवन्ते

(iii) वयं सर्वदा गुरुं ______________ ।

(क) नमेत्　　　　　　　　(ख) नमेः

(ग) नमेम　　　　　　　　(घ) नमेव

9 **अधोलिखितवाक्येषु रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत -** 3×1=3

(i) सूचनाः **लब्धुं** लाभम् अवाप्तुम् च।

(क) लभ् + क्त　　　　　　　　(ख) लभ् + तुमुन्

(ग) लभ् + ल्यप्　　　　　　　　(घ) लभ् + क्तवतु

(ii) अस्मान् अभावात् **उद्धृत्य** आर्थिकसम्पन्नतां प्रति नयति।

(क) उत् + धृ + तुमुन्　　　　　　　　(ख) उत् + धृ + क्त्वा

(ग) उत् + धृ + ल्यप्　　　　　　　　(घ) उत् + धृ + क्त

(iii) कपिलः अवकाशकाले मातुलगृहं **गम् + क्तवतु** ।

(क) गत्वा　　　　　　　　(ख) गतवान्

(ग) आगत्य　　　　　　　　(घ) गन्तुम्

10 **अधोलिखितवाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत -** 3×1=3

(i) सर्वतः **शान्तिसंस्थापकं** संस्कृतम् ।

(क) शान्तिः संस्थापकम्　　　　　　　　(ख) शान्तेः संस्थापकम्

(ग) शान्त्या संस्थापकम्　　　　　　　　(घ) शान्त्यां संस्थापकम्

(ii) बाल्यकालतः एव खुदीरामः **असाधारणः** आसीत् ।

(क) न साधारणः　　　　　　　　(ख) साधारणः न

(ग) साधारणम्　　　　　　　　(घ) अ साधारणः

(iii) भारते अनेके **देशस्य भक्ताः** अभवन् ।

(क) देशस्यभक्तः　　　　　　　　(ख) देशभक्तौ

(ग) देशभक्ताः　　　　　　　　(घ) देशभक्ते

11 **अ. उचितसंस्कृत-सङ्ख्यावाचकपदैः रिक्तस्थानानि पूरयत -** 3×1=3

(i)____________ (1) शिक्षकः पाठयति।

(ii)____________ (85) कन्याः सन्ति।

(iii)____________ (77) गायिका: गीतं गायन्ति।

**अथवा**

**आ. उचितसंस्कृत-सङ्ख्यावाचकपदैः रिक्तस्थानानि पूरयत।**

(i) एकस्यां कक्षायां ____________ (82) छात्राः सन्ति।

(ii) दले ____________ (22) क्रीडकाः सन्ति।

(iii) वृक्षे ____________ (2) वानरौ कूर्दतः।

12. **अ. निर्देशानुसारम् उत्तरत -** 4×½=2

(i) 'स्, श्, ष्' अत्र मूर्धन्यवर्ण: क: अस्ति ?

(ii) 'आसीत्' अस्य पदस्य 'आ' वर्णस्य उच्चारणस्थानं किमस्ति ?

(iii) 'क् , ध् , प् , य्' एतेषु वर्णेषु कस्य वर्णस्य उच्चारणस्थानं दन्त्यः अस्ति ?

(iv) 'ह् , अ , ख् , य्' एतेषु वर्णेषु कस्य वर्णस्य उच्चारणस्थानं कण्ठ: नास्ति ?

**अथवा**

**आ. निर्देशानुसारम् उत्तरत -**

(i) 'क्' वर्णस्य उच्चारणस्थानं किमस्ति ?

(ii) 'ज्, च्, झ्, ग्' एतेषु वर्णेषु कस्य वर्णस्य उच्चारणस्थानं तालु नास्ति ?

(iii) 'ए' वर्णस्य उच्चारणस्थानं किमस्ति ?

(iv) 'ऊ' वर्णस्य उच्चारणस्थानं किम् ?

13 **मञ्जूषातः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत -** 4×½=2

(i) यदा स: आगमिष्यति ____________ वयं गमिष्याम: ।

(ii) यथा अहं पठामि ____________ एव त्वमपि पठ ।

(iii) मोहन: आपणं __________ अगच्छत् ?

(iv) आचार्य: शिष्यः __________ आश्रमात् बहिः गमिष्यतः।

**मञ्जूषा -**

| कदा, च , तथा, तदा |
|---|

**खण्डः - 'घ' (पठित-अवबोधनम्) (30 अङ्काः )**

14 **अधोलिखित गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।** 5

भौतिकतावादियुगस्य आकर्षणेन यूनामपव्ययः अधिको भवति येन कारणेन अस्माकम् आर्थिकस्थितिः विपन्ना भवति । किन्तु अर्थविषयकसचेतनता अस्मान् अभावात् उद्धृत्य आर्थिकसम्पन्नतां प्रति नयति । अतः बुद्धिमतां छात्राणां ध्येयं स्यात्-धनस्य उचितोपार्जनम्, व्ययस्य मर्यादा, आपात्कालीननिधिसञ्चयः, दीर्घकालीननिवेशश्च । यः एतेषाम् अनुशासनेन पालनं करोति, स एव यथार्थतः धनस्य धर्मस्य च सन्तोलनं स्थापयितुं शक्नोति । यः विद्यार्थी अद्य अर्थविषये जागरूकोऽस्ति, सः भविष्ये उत्तरदायी नागरिको भवति । धर्मः, अर्थः, सुखम् चेत्येतेषां सन्तुलनम् एव यथार्थजीवनस्य लक्षणम् । अतः एवोक्तम् –

क्षणशः कणशश्चैव विद्यामर्थं च साधयेत्।
क्षणे नष्टे कुतो विद्या कणे नष्टे कुतो धनम्॥

I. **एकपदेन उत्तरत - (केवलं प्रश्नद्वयम् )** 2×½×=1

(i) कस्य उचितोपार्जनम् ?

(ii) धर्मः, अर्थः, सुखं चेत्येतेषां सन्तुलनं कस्य लक्षणम् ?

(iii) अर्थविषयकसचेतनता अस्मान् कां प्रति नयति ?

II. **पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् )** 2×1=2

(i) आर्थिकस्थितिः केन कारणेन विपन्ना भवति ?

(ii) बुद्धिमतां छात्राणां ध्येयं किं स्यात् ?

(iii) विद्यार्थी उत्तरदायी नागरिकः कदा भवति ?

III. **अ. यथानिर्देशम् उत्तरत** - 2×1=2

(i) 'सः भविष्ये उत्तरदायी नागरिको भवति' अत्र किं क्रियापदं प्रयुक्तम् ?

(ii) 'असन्तुलनम्' इत्यस्य पदस्य अत्र किं विलोमपदं प्रयुक्तम् ?

**अथवा**

**आ. यथानिर्देशम् उत्तरत -**

(i) 'बुद्धिमतां छात्राणां' अत्र किं विशेषणपदं प्रयुक्तम् ?

(ii) 'यः एतेषाम् अनुशासनेन पालनं करोति' अत्र क्रियापदं किम् अस्ति ?

15 **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** 5

**सर्वमस्तिष्कसंस्कारकं संस्कृतम्,सर्ववाणीपरिष्कारकं संस्कृतम्,**
**सत्पथप्रेरणादायकं संस्कृतम्, सद्गुणग्रामसन्धायकं संस्कृतम् ॥**
**शब्दलालित्यलीलावनं संस्कृतम्, चारुमाधुर्यधारागृहं संस्कृतम्।**
**विश्वचेतश्चमत्कारकं संस्कृतम्, पूर्वजानां यशः स्मारकं संस्कृतम्।।**

I. **एकपदेन उत्तरत - (केवलं प्रश्नद्वयम् )** 2×½×=1

(i) सत्पथप्रेरणादायकं किम् ?

(ii) संस्कृतं कस्य लीलावनम् अस्ति?

(iii) संस्कृतं केषां यशसः स्मरणं कारयति?

II. **पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् )** 2×1=2

(i) कस्य संस्कारकं संस्कृतम् ?

(ii) संस्कृतं कां परिष्करोति ?

(iii) विश्वचेतसः चमत्कारकं किम्?

III. **अ. यथानिर्देशम् उत्तरत -** 2×1=2

(i) 'सन्मार्गः' इत्यर्थे अत्र किं पर्यायः प्रयुक्तम् ?

(ii) 'दुर्गुण': इत्यस्य पदस्य किं विलोम पदं प्रयुक्तम् ?

**अथवा**

**आ. यथानिर्देशम् उत्तरत् -**

(i) 'अपयशः' पदस्य विपर्ययं पद्यांशात् चित्वा लिखत?

(ii) 'स्मारकं संस्कृतम्' अत्र विशेषणपदं किमस्ति?

16 **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।** **5**

**माधवी** - अहं श्रुतवती यत् नामदेवस्य कीर्तने स्वयं देवः पाण्डुरङ्गः नृत्यं कृतवान् इति। अपि सत्यम्?

**मातमही** - आम् तस्यैव पुण्यश्लोकस्य पाण्डुरङ्गमित्रस्य नामदेवमहाराजस्य एषा कथा। नामदेवः न केवलं पाण्डुरङ्गस्य प्रियभक्तः अपि तु प्रियमित्रमपि । देवः नामदेवं परितः भवति स्म ।

**माधवी** - किं सत्यमेव नामदेवस्य मित्रम् आसीत् पाण्डुरङ्गः?

**कपिलः** - किं देवेन सह अपि मित्रता सम्भवति ?

**मातमही** - आम् वत्सौ । देवः पाण्डुरङ्गः नामदेवस्य प्रियसुहृदासीत्। नामदेवः प्रतिदिनं पाण्डुरङ्गाय नैवेद्यं समर्प्य, तं भोजयित्वा ततः परमेव अन्नं सेवते स्म। तस्य गुरुः आसीत् विसोबा ।

विसोबा तम् अध्यापितवान् यत् 'ईश्वरः न केवलं मन्दिरे भवति, अपि तु सर्वेषु भूतेषु तस्य निवासो भवति। अतः तस्य सर्वात्मकस्य ईश्वरस्य पूजनं कुरु' इति ।

I. **एकपदेन उत्तरत - (केवलं प्रश्नद्वयम् )** 2×½×=1

(i) नृत्यं कः कृतवान् ?

(ii) पाण्डुरङ्गस्य प्रियमित्रं कः आसीत् ?

(iii) नामदेवस्य गुरुः कः आसीत् ?

II. **पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् )** 2×1=2

(i) नामदेवः प्रतिदिनं किं - किं करोति स्म ?

(ii) विसोबा नामदेवं किम् अध्यापितवान् ?

(iii) किं देवेन सह अपि मित्रता सम्भवति ?

**III. अ. यथानिर्देशम् उत्तरत** - 2×1=2

(i) 'असत्यम्' इत्यस्य पदस्य अत्र किं विलोमपदं प्रयुक्तम् ?

(ii) 'विसोबा तम् अध्यापितवान्' अत्र किं कर्तृपदं प्रयुक्तम् ?

**अथवा**

**आ. यथानिर्देशम् उत्तरत -**

(i) 'देवः नामदेवं परितः भवति स्म' अत्र कर्तृपदं किम् ?

(ii) 'शत्रुः' इत्यस्य पदस्य अत्र किं विलोमपदं प्रयुक्तम् ?

17 **रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कृत्वा पूर्णवाक्येन लिखत -** (5×1=5)

(i) **<u>अनैतिकः</u>** आर्थिकव्यवहारः कदापि न करणीयः ।

(ii) शुनकः आगत्य मुखे **<u>रोटिकां</u>** धृत्वा धावितवान्।

(iii) **<u>यन्त्राणि</u>** दत्तांशमाध्यमेन शिक्ष्यन्ते।

(iv) **<u>बङ्गप्रान्ते</u>** क्रान्तिवीराणां गुप्तगतिविधिभिः आङ्ग्लाः संत्रस्ताः आसन्।

(v) **<u>खुदीरामस्य</u>** बाल्यकाले एव तस्य पितरौ दिवङ्गतौ।

18 **अ. मञ्जूषायाः साहाय्येन श्लोकस्य अन्वये रिक्तस्थानानि पूरयित्वा पुनः लिखत -** (4×1=4)

**क्षणशः कणशश्चैव विद्यामर्थं च साधयेत् ।**
**क्षणे नष्टे कुतो विद्या कणे नष्टे कुतो धनम् ॥**

**अन्वयः -** क्षणशः (i)___________च एव (ii)__________अर्थं च साधयेत्। क्षणे नष्टे (iii)_____________विद्या ? कणे नष्टे कुतः (iv)___________?

**मञ्जूषा –** | **विद्याम्, कुतः, धनम्, कणशः** |

**अथवा**

**आ. मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थं रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**भारतीयैकतासाधकं संस्कृतम्, भारतीयत्वसम्पादकं संस्कृतम्**
**ज्ञानपुञ्जप्रभादर्शकं संस्कृतम्, सर्वदानन्दसन्दोहदं संस्कृतम् ॥**

**भावार्थः -** संस्कृतभाषा, भारतीयानाम् (i)__________ साधयति, (ii)____________

सम्पादयति, ज्ञानसमूहस्य (iii)__________ दर्शयति, सर्वदा आनन्दस्य परम्परामेव (iv)__________ च ।

**मञ्जूषा -** | भारतीयत्वं, ऐक्यं, जनयति, प्रभाम् |

19 **अधोलिखित-कथां रिक्तस्थानानि पूरयित्वा पुनः लिखत -** (6×½=3)

बङ्गप्रान्ते क्रान्तिवीरैः (i)__________ बहूनि गुप्तमण्डलानि आङ्ग्लानां मनसि आतङ्क जनयन्ति स्म। कस्यचित् गुप्तमण्डलस्य (ii)__________आसीत् सत्येन्द्रनाथः। खुदीरामः स्वमित्रेण (iii)__________ सह गत्वा सत्येन्द्रनाथेन अमिलत्। सत्येन्द्रनाथः उपादिशत्-"क्रान्तिकार्यं कर्तुं शरीरं (iv)__________ दृढं, बुद्धिः असिधारा इव तीक्ष्णा, मनः गङ्गाजलमिव (v)__________ च भवेत् इति"।तस्मात् गुप्तप्रशिक्षणकेन्द्रात् द्वाभ्याम् अष्टमासात्मकं प्रशिक्षणं प्राप्तम्। भुशुण्डिसञ्चालने अपि तौ अचिरादेव (vi)__________ सञ्जातौ।

**मञ्जूषा -** | सञ्चालकः, वज्रसदृशम्, निर्मलम्, सञ्चालितानि, प्रवीणौ, प्रफुल्लेन |

20 **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत-** (3×1=3)

(i) कीटनिरीक्षणं, भूमिक्षमता इत्यादीनां **<u>परीक्षणम्</u>** अपि यन्त्रैः भवति ।

(क) उपकरणम् (ख) समीक्षणम्

(ग) संवादसाधनम् (घ) संगणकम्

(ii) मुखे तृप्तिः **<u>तेजः</u>** आसीत् ।

(क) शीघ्रम् (ख) मन्दम्

(ग) प्रकाशः (घ) निश्चयः

(iii) योऽर्थे **<u>शुचिः</u>** हि सः शुचिः ।

(क) पवित्रम् (ख) विवेकः

(ग) कर्तव्यः (घ) सत्यः